# च , एव , अपि , इति - एते अव्ययपदानि

**एतेषां पदानाम् अवगमनार्थम् एतत् सम्भाषणं पठतु ।**

सुरेशः – आनन्द ! अद्यतनस्य कार्यक्रमार्थं सर्वे सिद्धाः सन्ति किम् ?

आनन्दः – आम् भोः । सर्वे सिद्धाः **एव** ।

सुरेशः – तर्हि के के किं किं कुर्वन्ति ?

आनन्दः – नलिनी, माला, दिव्या **च** गीतं गायन्ति । राधा **अपि** गायामि इति उक्तवती। यदि आगच्छति चेत् ।

सुरेशः – **अपि च** अन्ये किं कुर्वन्ति ?

आनन्दः – अहं, कृष्णः, गोविन्दः, दिलीपः, वाणी, ललिता, चन्द्रिका **च** मिलित्वा एकं नाटकं प्रदर्शयामः ।

सुरेशः – किरणः **अपि** नाटके भवामि इति उक्तवान् खलु? ।

आनन्दः – सः अद्य नगरे नास्ति **एव** भोः । प्रवासे अस्ति । तस्य स्थाने अहं नटिष्यामि **इति** प्रसादः उक्तवान्।

सुरेशः – **एवं** वा ? अस्तु । तर्हि सायङ्काले मिलामः । भवतः कार्यक्रमः यशस्वी भवतु ।

आनन्दः – धन्यवादः सुरेश ! सायङ्काले मिलामः ।

## च इत्यस्य प्रयोगः समुच्चयः (समूहः) इति अर्थे भवति।

**यथा** - रमेशः शालां गच्छति। अच्युतः शालां गच्छति। अनन्तः शालां गच्छति।

रमेशः अच्युतः अनन्तः **च** शालां गच्छन्ति।

तथा एव -

गौरी लता लक्ष्मीः **च** ग्रन्थालयं गतवत्यः।

माता ओदनं क्वथितं **च** पचति।

पिता फलानि शाकानि पुष्पाणि **च** क्रीतवान्।

**अभ्यासः**

उदाहरणम् -

गृहे द्वारं वातायनं जवनिका **च** सन्ति।

मार्गे लोकयानानि, कारयानानि, द्विचक्रिकाः, च सन्ति।

1. आकाशे --- --- --- च सन्ति।
2. आपणे --- --- --- --- सन्ति।
3. विद्यालये --- --- --- --- ---।
4. --- --- --- --- --- ---।
5. --- --- --- --- --- ---।
6. --- --- --- --- --- ---।
7. --- --- --- --- --- ---।
8. --- --- --- --- --- ---।

## एव इत्यस्य प्रयोगः

**रमेशः अच्युतः अनन्तः च मन्दिरं गतवन्तः।**

रमेशः अच्युतः अनन्तः च मन्दिरं **एव** गतवन्तः। **अर्थः** - अन्यत्र कुत्रापि न गतवन्तः।

रमेशः अच्युतः अनन्तः च मन्दिरं गतवन्तः **एव**। **अर्थः** - **निश्चयेन** मन्दिरं गतवन्तः।

रमेशः **एव** मन्दिरं गतवान्। **अर्थः** - अच्युतः अनन्तः च मन्दिरं न गतवन्तौ।

**अभ्यासः**

उदाहरणम् -

सीता आम्रफलं कदलीफलं पनसफलं **च** खादति।

सीता आम्रफलम् **एव** खादति।

सीता आम्रफलं खादति **एव** ।

सीता **एव** आम्रफलं खादति।

एवम् -

अरुणः लेखनीम् --- --- च पश्यति।

अरुणः --- --- पश्यति।

अरुणः --- पश्यति ---।

अरुणः --- --- पश्यति।

--- --- --- --- --- --- ।

--- --- --- --- --- --- ।

--- --- --- --- --- --- ।

--- --- --- --- --- --- ।

## अपि इत्यस्य प्रयोगः

**रमेशः अच्युतः च क्रीडतः।**

अनन्तः **अपि** क्रीडति। **अर्थः** - रमेशः अच्युतः च क्रीडतः। तदा अनन्तः अपि क्रीडति।

अनन्तः पादकन्दुकम् **अपि** क्रीडति । **अर्थः** - अनन्तः अन्याः क्रीडाः अपि क्रीडति। यथा - सः कण्डोलकन्दुकम् (basketball) **अपि** क्रीडति ।

अनन्तः क्रीडति **अपि** । **अर्थः** - अनन्तः अन्यानि कार्याणि अपि करोति, यथा, आपणं गच्छति। कन्दुकं क्रीणाति। गृहम् आगच्छति। क्रीडति **अपि**।

**अभ्यासः**

**विमला वाणी च क्रीडतः।**

**कमला ---** क्रीडति।

--- --- **---** क्रीडति ।

--- --- **---**।

## इति इत्यस्य प्रयोगः -

**इति** इत्यस्य पूर्वं यत् भवति तत् **यथावत्** तिष्ठति। यथा "---" मध्ये तिष्ठति।

उदाहरणम् -

तस्य स्थाने अहं नटिष्यामि **इति** प्रसादः उक्तवान्। "तस्य स्थाने अहं नटिष्यामि"

अद्यतन नाटके अहम् आगमिष्यामि **इति** सुरेशः वदति। "अद्यतन नाटके अहम् आगमिष्यामि"

सायङ्काले मिलामः **इति** आनन्दः वदति। "सायङ्काले मिलामः"

**अभ्यासः**

--- --- --- --- --- --- वदति।

--- --- --- --- --- --- पृच्छति।

--- --- --- --- --- --- उक्तवती।

--- --- --- --- --- --- सूचितवान्।

**अभ्यासः – उपरिदत्तं सम्भाषणम् अनुसृत्य स्व-शब्दैः एकं सम्भाषणं लिखतु ।**

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------

-----------------------------------------------------------------------